श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ प्रक्षिप्तेषु प्रथमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ प्रक्षिप्तेषु प्रथमः सर्गः ॥

## श्रीरामद्वारि कार्यार्थिनः शुन आगमनं राजसभायां तमानेतुं श्रीरामस्य लक्ष्मणं प्रत्यादेशः

ततः प्रभाते विमले कृत्वा पौर्वाह्णिकी क्रियाम्।
धर्मासनगतो राजा रामो राजीवलोचनः॥ **1** ॥

राजधर्मानवेक्षन् वै ब्राह्मणैर्नैगमैः सह।
पुरोधसा वसिष्ठेन ऋषिणा कश्यपेन च॥ **2** ॥

मन्त्रिभिर्व्यवहारज्ञैस्तथान्यैर्धर्मपाठकैः।
नीतिज्ञैरथ सभ्यैश्च राजभिः सा सभा वृता॥ **3** ॥

सभा यथा महेन्द्रस्य यमस्य वरुणस्य च।
शुशुभे राजसिंहस्य रामस्याक्लिष्टकर्मणः॥ **4** ॥

अथ रामोऽब्रवीत् तत्र लक्ष्मणं शुभलक्षणम्।
निर्गच्छ त्वं महाबाहो सुमित्रानन्दवर्धन॥ **5** ॥

कार्यार्थिनश्च सौमित्रे व्याहर्तुं त्वमुपाक्रम।
रामस्य भाषितं श्रुत्वा लक्ष्मणः शुभलक्षणः॥ **6** ॥

द्वारदेशमुपागम्य कार्यिणश्चाह्वयत् स्वयम्।
न कश्चिदब्रवीत् तत्र मम कार्यमिहाद्य वै॥ **7** ॥

नाधयो व्याधयश्चैव रामे राज्यं प्रशासति।
पक्वसस्या वसुमती सर्वौषधिसमन्विता ॥ **8** ॥

न बालो म्रियते तत्र न युवा न च मध्यमः।
धर्मेण शासितं सर्वं न च बाधा विधीयते ॥ **9** ॥

दृश्यते न च कार्यार्थी रामे राज्यं प्रशासति।
लक्ष्मणः प्राञ्जलिर्भूत्वा रामायैवं न्यवेदयत् ॥ **10** ॥

अथ रामः प्रसन्नात्मा सौमित्रिमिदमब्रवीत्।
भूय एव तु गच्छ त्वं कार्यिणः प्रविचारय ॥ **11** ॥

सम्यक्प्रणीतया नीत्या नाधर्मो विद्यते क्वचित्।
तस्माद् राजभयात् सर्वे रक्षन्तीह परस्परम् ॥ **12** ॥

बाणा इव मया मुक्ता इह रक्षन्ति मे प्रजाः।
तथापि त्वं महाबाहो प्रजा रक्षस्व तत्परः ॥ **13** ॥

एवमुक्तस्तु सौमित्रिर्निर्जगाम नृपालयात्।
अपश्यद् द्वारदेशे वै श्वानं तावदवस्थितम् ॥ **14** ॥

तमेव वीक्षमाणं वै विक्रोशन्तं मुहुर्मुहुः।
दृष्ट्वाथ लक्ष्मणस्तं वै स पप्रच्छाथ वीर्यवान् ॥ **15** ॥

किं ते कार्यं महाभाग ब्रूहि विस्रब्धमानसः।
लक्ष्मणस्य वचः श्रुत्वा सारमेयोऽभ्यभाषत ॥ **16** ॥

सर्वभूतशरण्याय रामायाक्लिष्टकर्मणे।
भयेष्वभयदात्रे च तस्मै वक्तुं समुत्सहे ॥ **17** ॥

एतच्छ्रुत्वा च वचनं सारमेयस्य लक्ष्मणः।
राघवाय तदाख्यातुं प्रविवेशालयं शुभम्॥ **18**॥

निवेद्य रामस्य पुनर्निर्जगाम नृपालयात्।
वक्तव्यं यदि ते किञ्चित् तत्त्वं ब्रूहि नृपाय वै॥ **19**॥

लक्ष्मणस्य वचः श्रुत्वा सारमेयोऽभ्यभाषत।
देवागारे नृपागारे द्विजवेश्मसु वै तथा॥ **20**॥

वह्निः शतक्रतुश्चैव सूर्यो वायुश्च तिष्ठति।
नात्र योग्यास्तु सौमित्रे योनीनामधमा वयम्॥ **21**॥

प्रवेष्टुं नात्र शक्ष्यामि धर्मो विग्रहवान् नृपः।
सत्यवादी रणपटुः सर्वसत्त्वहिते रतः॥ **22**॥

षाड्गुण्यस्य पदं वेत्ति नीतिकर्ता स राघवः।
सर्वज्ञः सर्वदर्शी च रामो रमयतां वरः॥ **23**॥

स सोमः स च मृत्युश्च स यमो धनदस्तथा।
वह्निः शतक्रतुश्चैव सूर्यो वै वरुणस्तथा॥ **24**॥

तस्य त्वं ब्रूहि सौमित्रे प्रजापालः स राघवः।
अनाज्ञप्तस्तु सौमित्रे प्रवेष्टुं नेच्छयाम्यहम्॥ **25**॥

आनृशंस्यान्महाभागः प्रविवेश महाद्युतिः।
नृपालयं प्रविश्याथ लक्ष्मणो वाक्यमब्रवीत्॥ **26**॥

श्रूयतां मम विज्ञाप्यं कौसल्यानन्दवर्धन।
यन्मयोक्तं महाबाहो तव शासनजं विभो॥ **27**॥

श्वा वै ते तिष्ठते द्वारि कार्यार्थी समुपागतः।
लक्ष्मणस्य वचः श्रुत्वा रामो वचनमब्रवीत्।
सम्प्रवेशय वै क्षिप्रं कार्यार्थी योऽत्र तिष्ठति॥ **28** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे प्रक्षिप्तेषु प्रथमः सर्गः॥